अथ बौधायन आधानसूत्रप्रारंभः

श्रीगणेशायनमः॥ ॥ॐ अथोपव्याहरणंविज्ञायतेक्रत्वोदोक्रतुकामंमथीनयसांगोदो
यसांगकाममितिब्राह्मूलान्दर्भान्संस्तीर्यतेषुप्राङ्मुखोयजमानउपविश्यजपतियाः
पुरस्तात्स्वस्तयंतुपरिष्टात्सर्वनश्चयाः॥नाभीरश्मिपवित्राभिः॥अक्षांयज्ञमारभे॥देवा
गातुविदोगातुंयज्ञायविंदत॥मनसस्पतिनोदेवेनवानायुक्तः प्रयुज्यनामिनिश्चक्षामाहूय
निश्चक्षएहिसत्येनत्वाद्दयामीत्याकूत्यावेदनंकरोत्याकूत्येत्वाकामायत्वासमृध्येत्वा॥
पुरोधेअमृतत्वायजीवसे॥आकूतिमस्यावसेकाममस्यसमृध्ये॥इंद्रस्ययुंजनेधियः
आकूतिंदेवीमनसःपुरोदधेयज्ञस्यमातासुहवामेअस्तु॥यदिच्छामिमनसासकामोनि
देयमनस्यहृदयेनिविष्टमितिमनसात्रिःसंल्पयतेत्रिरुच्चैसर्वकामाग्नीनाधास्यन्नित्यग्न्या
धेयेस्वर्गकामोदर्शपूर्णमासाभ्यांयक्ष्यन्नितदर्शपूर्णमासयोःस्वर्गकामश्चानुमीस्येर्य
क्ष्यन्निचानुमीस्येषु॥स्वर्गकामःपशुनायक्ष्यन्निपशुबंधे॥स्वर्गकामःसोमेनयक्ष्यन्

विसोमे॥स्वर्गकामोग्निंचेष्यन्नित्यग्निचयनेहोनेहगेऐवायाकामायत्कामोवायजतेतन्म
ऋध्यतांतन्मेसमृध्यतांतन्मेसंपद्यतांकामइत्यथर्त्विजांप्रतिवचनंतन्नऋध्यतांतन्मेसमृ
ध्यतांतन्मेसंपद्यतांकामइत्येतेथप्रतिवचनं॥ १ ॥अथर्त्विजोदेवयजनंयाचतेध्वर्यो
देवयजनंमेदेहीत्यध्वर्युमादित्योदेवोदेव्योध्वर्युःसनेदेवयजनंददातित्येतेथप्रतिव
चनंब्रह्मन्देवयजनंमेदेहीतिब्रह्माणंचंद्रमादेवोदेव्योब्रह्मासनेदेवयजनंददातिनिओं
तेथप्रतिवचनंहोतुर्देवयजनंमेदेहीतिहोतारमग्निर्देवोदेवोहोतासनेदेवयजनंदद
तित्येतेथप्रतिवचनमुद्गातर्देवयजनंमेदेहीत्युद्गातारंपर्जन्योदेवोदेवउद्गातासनेदेव
यजनंददातित्येतेथप्रतिवचनंसदस्यदेवयजनंमेदेहीतिसदस्यमाकाशोदेवोदे
वंसदस्यःसनेदेवयजनंददातित्येतेथप्रतिवचनंहोत्रकादेवयजनंमेदेत्तेतिहोत्रका
नापोदेव्योदेव्योहोत्राश्चंसिन्यस्तास्तेदेवयजनंददतित्येतेथप्रतिवचनंचमसाध्व

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

यैवोदेवयजनंमेदस्तिचमसाध्वर्यूनन्नमयोदेवोदेव्याश्चमसाध्वर्यवस्तेदेवयजनंद
क्षिस्यांतथेतिप्रतिवचनमपिवानेदेवयजनंयाचनआदित्यवतीर्थस्तोदेत्याह
तंवासःपरिधायशुक्लोहैवरुचिःपूतोमेध्योविपाप्माब्रह्मचारीसहकारिप्रत्यवआ
चतुर्थीकर्मणोभिसमीक्षमाणोविदकर्मीणिप्रयोजयेत्यागपवर्गीण्युदगपवर्गाणि
वाप्राङ्मुखःप्रदक्षिणंयज्ञोपवीतीदेवानिकर्मीणिकरोतिदक्षिणामुखःप्रसव्यंप्राचीना
वीतीपित्र्याणिनिष्टन्नासीनःप्रहोवायथान्यायंछंदोब्राह्मणंयथावेदक्षिणःपाणि
रेवंदेवयजनंयथासव्यस्तथापितृयजनंयथापितृयजनंतथाग्नमग्नानकरणंयथाग्न
ग्नानकरणंतथाभिचारणीयेष्टिष्टिपशुसोमेषादित्यएवपुरोदकंदेवयजनंयस्मादन्य
त्पुरस्तात्समनिकंदेवयजनंतविंदेयुरुत्तरतोदेवयजनमात्रमितिविज्ञायते॥ २ ॥अ
थर्त्विजांवरणंविज्ञायतेब्राह्मणाऋत्विजोयोनिगोत्रश्रुतवृत्तसंपन्नाः॥अविगुणांस्त्र

अनवकीर्णिनोअत्रिकिणिनोपरिवीतिक्रीतानौतंगानौत्सजनाननूचानाहालेयबालेय
पुत्रिकापुत्रपरिवेत्रसहोटकानीनानुजावरद्विप्रवरान्प्रतिहार्य्यांगिरसोध्वर्युर्वासिष्ठो
ब्रह्मावैश्वामित्रोहोतायास्यउद्गातौकौषीतकःसदस्यावसिष्ठमृगवोंगिरसोवोयोनिवृ
त्तंविद्याचप्रमाणमित्येकेनाऽश्वेद्वृणीताव्यपलागानेवरुणीताकुत्सिनमध्वर्युम
किलासिनंब्रह्माणमषंढंऽहोनारमकरालमुद्गातारमत्रिंपिविष्टंऽसदस्यंअथप्रतिप्र
स्थातानेष्टोन्नेतेत्यध्वर्युपुरुषाब्राह्मणाछंऽस्याग्नीध्रःपेतेतिब्राह्मणोमैत्रावरुणोछा
वाकोग्रावस्तुतिहोतुःप्रस्तोताप्रतिहर्तासुब्रह्मण्यऽत्युद्गातुरभिगेतोऽध्वगेपःसंऽ
स्तोवऽतिसदस्यस्यस्वप्रधानाअस्वप्रधानाऽइत्येकेदशवेकादशावाचमसाध्वर्योर्नत
दक्षिणाग्निःपरिक्रीतामवनीतिविज्ञायतेनत्साद्ग्निहोत्रस्ययज्ञक्रतोरेकऋत्विक्
दर्शपूर्णमासयोश्चत्वारऋत्विजोध्वर्युर्ब्रह्माहोताग्नीध्रइतिचातुर्मास्येषुप्रतिप्रस्था

तापंचमःपशुबंधेमैत्रावरुणःषष्ठःसर्वसोम्येध्वरेतान्कर्मणःकर्मणोरूपंतैकैकमुपसं
एत्यचोदयेदसावहमाध्वर्यवेणत्वागछामियाजयतुमांभवानितिब्रह्मत्वेनहोत्रेणोद्गात्रेए
सादस्येनेतिनसदस्योविद्यतइत्येकेत्वेनकर्मणाहोत्रकान्हौत्रकानित्येकेनत्पुरुषाहोत्र
काश्चमसाध्वर्यवश्चाध्वर्युर्वाऋत्विजांप्रथमोयुज्यतेतेनत्लोमोयोक्त्रंइति॥ ३ ॥आ
दित्योदेवोदेवाध्वर्युःसमेध्वर्युरध्वर्योध्वर्युत्वांदृएइत्यध्वर्युमादित्योदेवोदेवोध्वर्युःस
नेध्वर्युःस्तेनानुमनःकर्मेवाहंकरिष्यामीत्योंतथेतिप्रतिवचनंचंद्रमादेवोदेवोब्रह्मासमे
ब्रह्माब्रह्मन्ब्रह्माणंत्वादृएइतिब्रह्माणंचंद्रमादेवोदेवोब्रह्मासतेब्रह्मतेनानुमनःक
र्मेवाहंकरिष्यामीत्योंतथेतिप्रतिवचनमग्निर्देवोदेवोहोतासमेहोताहोतर्हीतारंत्वादृ
णइतिहोतारमग्निर्देवोदेवोहोतासतेहोतातेनानुमनःकर्मेवाहंकरिष्यामीत्योंतथेतिप्र
तिवचनंपर्जन्योदेवोदेवउद्गातासमउद्गातोद्गातरुद्गातारंत्वादृणइत्युद्गातारंपर्जन्योद्

३

वोदेवउद्गातासतउद्गातातेनानुमनःकर्मेवाहंकरिष्यामीत्योंतथेतिप्रतिवचनमाकाशोदेवो
देवःसदस्यःसमेसदस्यःसदस्यसदस्यंत्वादृणइतिसदस्यमाकाशोदेवोदेवःसदस्यःस
तेसदस्यस्तेनानुमनःकर्मेवाहंकरिष्यामीत्योंतथेतिप्रतिवचनंआपोदेव्योदेव्यात्रात्रूंसि
नस्तेमेहोत्रात्रात्रूंसिनोहोत्रात्रात्रूंसिनोहोत्रकान्त्वोदृएइतिहोत्रकान्त्मापोदेव्योदेव्याहोत्रा
त्रात्रूंसिन्यस्तास्तेहोत्रात्रात्रूंसिन्यस्तामिरनुमनाःकर्मेववयंकरिष्यामइतिओंतथेतिप्रतिव
चनंरत्नमयोदेवोदेव्याश्वमसाध्वर्यवःस्तेमेचमसाध्वर्यवश्चमसाध्वर्यवश्चमसाध्वर्यून्वोदृए
इतिचमसाध्वर्यून्रत्नमयोदेवोदेव्याश्वमसाध्वर्यवस्तेतेचमसाध्वर्यवस्तैरनुमनाःकर्मेववयं
करिष्यामइत्योंतथेतिप्रतिवचनंदृतोदृतोजपतिमहन्मेवोचोयज्ञोमेवोचोमगोमेवोचोम
र्गोमेवोचस्तपोमेवोचस्तोमंमेवोचःकृषिंमेवोचोसुत्यांमेवोचोविश्वंमेवोचःसर्वंमेवोचःस
र्वंकल्याणंमेवोचःस्तान्मामवतुतन्मावित्रतुतन्मांजिन्वतुतेनसुक्षिषीयदेवोदेवमेतिसोमः

सोमम्मि त्यांतयेतिप्रतिवचनं॥ ४ ॥सिꣳहेमेमन्युर्व्याघ्रेमेंतरामयावृकेमेक्रुद्धेमे
घसिर्धन्वनिमेपिपासाराजगृहेमेत्रानयात्रमनिमेतद्विर्गदेभेमस्त्रिः श्वात्म्यकेमेह्री
रम्बयेमेवेपशुःकूर्मेमेगरोगोभ्रलेमेपसयाप्रियेमेमृत्युर्माध्येमेपाप्मासपत्नेमे
निर्ऋतिर्दुष्कीर्तिमेव्यृधिःपरस्विन्विमेसमृधिःखेड्गेमआर्तिगवयेमआध्यंगोरमे
बाधिर्यमृक्षेमेत्रोकोगोधायांमेत्वेदोजरायांमेहिमःकृष्णराकुनेमेमीरुताकरेमे
पापगंधउलूकेमत्रव्यत्राःक्लोकेमईर्ष्यामर्कटेमेदुर्ऋधिःकुलालेमेसꣳस्यालेमे
प्रध्योष्टमेतृष्णश्यैमेभ्रमोव्यामआव्यंकोरेमेगंधःकमार्यांमेलंकारःसूकरेमेक्रुद्धुः
प्रदासुनिमेस्वप्नोजगरेमेदुःस्वप्नोविद्युतिमेस्मयत्नोलोमायांमेक्रुद्धःवारमेपाप्मा
लक्ष्मीस्त्रीषुमेनृतंमज्ञासुमेकर्कोगोव्रोत्यमृत्याशूद्रेमेस्तेयंवैश्येमेकार्मिकुत्सरा
जसबंधुनिमेतानेनेषोदेमब्रह्महत्याकुलिंगेमेश्ववधुःरूलेमेविलासउद्रिणिमे ४

वमनिःकिंपुरुषेमेरोहोद्वीपिनिमेनिष्टप्यलिनिमेकिलासःसुनिमेदुरिष्प्रस्तावन्येषुमे
क्लेलोविदिहेषुमेत्रीपेथामहावर्षेषुमेग्लोःमूजवत्सुमेतप्रादुदुंभामेकाश्मीकेस्वाकु
षुमेपित्तंकलिंगेषुमेमेध्यमश्वनर्यांमेप्रजलापुꣳश्वित्यांमेदुश्चरित्रमाखुनिमेदंत
रोगोमक्षिकायांमेश्वल्कत्राःसुकेमेहरिमामूरमेज्जत्यादृषेमेजराचाषेमेयाप
चोदोप्सूमेश्रमोब्रह्महत्याहꣳसेमेकिल्बिषमेयेहिपाप्मा सुनरपनाशिनोमवानःपाप्मत्सू
क्तस्यलोकेपाप्मंधेस्वदिहेतोयोनःपाप्मन्नजहातिनमुत्वाजहिमोवयमन्यत्रास्मन्नि
विन्नानःꣳसहस्राक्षोअमर्त्योयोनोद्वेष्टिसरिष्यतुयमुद्विष्मस्तमुजहीत्यथांजलिना
उपहंतिसुमित्रानआपओषधयःसंतितिनाभिरुक्षतियस्यामस्यदिद्विष्टेभ्योभव
तिदुर्मित्रास्तस्मैभूयासुर्योस्मान्द्वेष्टियंचवयंद्विष्मइत्यथापउपस्पृश्ययथेतंप्रविशं
ति॥ ५ ॥अथेतमग्न्याधेयंतस्यकःकर्मणउपक्लेमाभवतीत्युक्तान्यृक्तुनक्षत्राण्यु

ऋमात्मनःपुरश्चरणंकृत्वामन्त्रानुपूर्व्यमवनिर्ल्लानपवनमंत्राचमनमंत्रप्रोक्षणपुण्याह्
वाचनानिश्रक्षामाहृत्याकृत्यावेदनंकृत्वापव्याहृत्यऋत्विजोवृत्वाहोपित्वादेवयजनंनया
चित्वादेवयजनमादायस्रुत्यमादायानेरणावेद्युत्करावुद्दनग्रपद्यजघनेननगार्हपत्यंनि
ष्टन्प्राचीꣳस्फ्यनगार्हपत्यस्यायतनमुल्लंत्युल्लन्यमानमस्माअमेध्यमपपाप्मानंय
जमानस्यहंतु॥त्रिवानःसंनुप्रदित्राश्वनस्रः॥शन्नोमानाष्टथिवीतोकसानेत्येथेनमद्भि
रवोक्षतिशन्नोदेवीरभिष्टयआपोभवंतुपीतये॥शंयोरभिस्रवंतुनः॥इत्येवमेवान्वाहार्य
पचनस्यायतनमुल्लंत्येवमाहवनीयेस्येवमिनरयोर्यदिकरिष्यन्भवत्यथानेरणावेद्युत्क
रावुद्दनोनोदुत्पनिष्क्रम्यनादित्रंयंतियत्रास्यसंभाराउपकॢप्ताभवंत्यपिवानेरणग्नाला
याःसर्वेसंभाराउकॢप्ताभवंत्यपिवानेर्वेदिप्राचीनंनान्मंत्रानुपूर्व्यमेकैकंसंभारमेकैकेन
यजुषासंभरंति॥वैश्वानरस्यरूपंपृथिव्यांपरिस्रसास्यानमाविद्यनुनइनिसिकनाः ५

संभृत्यनिदधात्येवमेवोत्तरमुत्तरꣳसंभारमुत्तरेणोत्तरेणयजुषासंभृत्यसंभृत्यनिदधा
त्युषाश्वसिकनाश्वाखूत्करंचवल्मीकवपांचसूदंचवराहविहतंचपुष्करपर्णंचन्यर्कं
राश्वेत्येषोपार्थिवान्अथोत्तरेणयजुषाषट्छिरण्यन्यात्कानामाहरत्यथवानस्पत्या
भिर्वानस्पत्याःशारवाआर्द्राःसपलाशाःसप्ररोहाःप्रादेशमात्रीअप्रतिशुष्काग्राआ
हरत्यपिवायथालिंपर्णद्वाभ्यांचित्रियस्याश्वत्थस्यतिस्रःसमिधआर्द्राःसपलाशाःस
प्ररोहाःप्रादेशमात्रीःअप्रतिशुष्काग्राआहरत्यपिवायथालिंचित्रियादश्वत्थात्संभृता
हृहत्यःशारीरमसिꣳस्कृनास्यप्रजापतिनायशमुखेनसंमिनाःस्त्रिस्त्रःस्त्रिवृद्भिर्मिथु
नाःप्रजात्यारत्यमुंजकुलायमाहरतिपोतेअग्नओजस्विनीननूरोषधीषुप्रविष्टा॥तांत
रहसंभरामीत्यथात्माअरणीआहरत्याश्वत्थीꣳशामीगर्भमिमथ्नन्नामीगर्भोवाचनुरगुल्मोत्ते
धांद्वादशांगुलविस्तीर्णोषोडशांगुलायतनाम्पिवाप्रादेशमात्रीसर्वनःसमांचनुरगुल्मुत्सो

धातस्यउत्तानायाअनुलोममधस्तात्पत्नीचीनप्रवर्णंप्रजननंकुर्वंतिनावृतीमेवोत्तरारणिमथैनेन
आहरत्यश्वत्थात्यग्न्वाहाधिजातामग्नेस्तनूरसियाऽसंभरामि॥शांतयोनिऽरग्नीगर्भम
ग्नयेप्रजनयितवे॥योअस्यःग्नीगर्भआतूरोहतेसचा॥तंतेहराभिब्रह्मणायज्ञियेः
केतुभिःसहेत्यथैनान्त्संभृत्यसंभारान्पुनरेवसंभरतियत्वासमभरंजातवेदोयथात्वारो
रंभृतेषुन्यक्तं॥संसंभृतःसीदशिवप्रजाभ्यउरुज्योतीलोकमनुनेषिविद्वानिति॥ ६ ॥अ
थैवैभवतिद्विरुत्तरऽहत्वासुरान्पराभाव्यसोमावास्यांप्रत्यागच्छन्॥तेपितरःपूर्वेद्युरागच्छ
न्॥पितृन्यज्ञोगच्छन्॥तंदेवाःपुनरयाचंननमेभ्योनपुनरद्दुस्तब्रुवन्वरंवृणामहे॥अथ
वःपुनर्दास्यामः॥अस्मभ्यंमवपूर्वेद्युःक्रियातारइति॥नमेभ्यःपुनरद्दुस्तस्मात्पितृभ्यः
पूर्वेद्युःक्रियते॥यत्पितृभ्यःपूर्वेद्युःकरोति॥पितृभ्यएवतद्यज्ञंनिष्क्रीणीतेयजमानःप्रतनु
तेऽग्निब्राह्मणमथयदिगार्हपतेमथमजंवालमनेपिवाद्यूतमोदनंपक्वंतस्यापरिष्टा ६

ल्लभूतमाज्यंपयोवामीयतस्मादेतत्सर्वंकरोतियद्वावाकार्यंविज्ञायतेयेनैवाएतद्रेतोयदाज्यंप
योवानुहस्तंडुलाइतिगोरंवांगसामान्यात्संप्रछन्नाअंबरीषंवोत्तपनीयंवाभिप्रव्रजंत्यपि
वोपासनमेवाभिप्रव्रजंत्यधोपासनंकुर्वंतिसर्वंह्येतदहिंकुर्वंतिसोत्रैवैहिहूयतइति
समानंकर्मासंभारनिवपनादथतृतीयंसंभाराणांत्रेधाविभाज्यसभ्यावस्थ्ययोराहवनीये
वासभ्यावसथ्ययोःसंकल्पःसमानंकर्मासमिदाधानात्संचपंचनानाक्षीयाःसमिधाभ्यज्या
दधातिकथमत्रानुपूर्वंभवत्यश्वत्थश्चौदुंबरश्चपर्णश्चाग्नीचविकंकतश्चेत्येतदत्रानुपूर्व्यंभव
तिकथमुखल्वेंद्राग्नादित्ययोरंतरेत्येंद्राग्नादित्ययोरंतउदाश्वपदिकंसृजेतेतोन्यदत्रोहात्रर्थं
सुक्षेरदितिनंत्रंसमासएवैनदुपद्यतेनान्यत्रप्रणीतस्याग्नेर्लौकिकत्वात्तस्मिन्होत्राहुतंस्यात्तो
ग्निःकर्मांतंनस्यधारणमित्यपहत्यैकर्मणिलौकिकःसंपद्यतेप्रसिक्षानिनहवाऽषिप्रसिक्षा
अग्न्याधेयदक्षिणादानाश्चेत्राधिगेछद्वासांस्येनावंनिमंथोन्वोदनोन्वेनावेतादधात्येनो

आधान ७

देवंकाममवाप्नोत्यप्येकांगादक्षिणादग्न्यादिनिपेगलायनिब्राह्मणंभवतिनतेवावाहिताग्निःस्या
द्विज्ञायतेचदेवानांवाएषोन्यतमोयआहिताग्निरित्यथयद्स्याग्निमुधरंतिसहस्रेणतेनकाम
दुघावरुंधेयद्यग्निहोत्रंजुहोतिसहस्रतेनेत्यपरिमितमेवदमुक्तंभवति॥ ७ ॥अथाग्न्या
धेयस्योपवसथद्स्युपकल्पयतेगोमाꣳसलोमहतंवासश्चतुरउदकुंभान्त्रीनोदुंबरांछूला
नोदुंबरींदवरमेकांचश्रपणीमविज्ञातस्यामोदुंबरीमेवसर्वानेवान्याꣳस्थालीपाकांस्तेन
नाम्यं यजिवास्तंभारोनेरकोपबर्हणेअंजन्याभ्यंजनेआज्यंतृणमुष्टिꣳस्यꣳसूत्रमिनिदक्षिण
तएतत्परिश्रितंभवतितस्यैतस्मिन्परिश्रितेप्राङावृत्तस्यैकशांतंकरोतिनूष्णीत्रीणिदर्भ
पुंजुलान्युपनिवपतिषेपत्सवपेद्देवनसवित्राप्रसूताब्रह्मणासꣳशितोहंयजमानोवस्त
दग्नामभिमंत्रयतेयानिमद्नर्उर्ध्वलोमानिनानिमेस्वस्तयेसंस्तित्यथैनमुपकेशश्मꣳ
निकृन्तनखमुदकुंभेनाभ्यवनयन्वाचयतिद्दामआपःशिवाःसंनुदुःकृतंप्रवहंतुमे॥ ७

सुधाःप्रयुंजीमहिक्रन्निनिसुस्नातःप्राङुपसृप्याहतंवासःपरिधायालंकृत्यांकेथेनमेकविं
शत्यादर्भपिंजुलैःस्त्रधाविसक्तैःसप्तभिःसप्तभिस्तूष्णीपवयित्वोदपात्रमादायमादित्यंनि
त्वाचतुष्पथएतस्मिन्नेवोदपात्रेवेक्षमाणंपाप्मनोविनिधीन्वाचयतिसिꣳहेमेमन्युर्व्या
घ्रेमेंतरायद्स्यानमेनमनुवाकंनिनीयायःपरास्यपात्रमणेवेक्षमाणाआयंनिहस्तपाद्
म्रक्षाल्येतेनेवयथेत्यमेत्यपवस्मानःसर्वजनद्स्येनमनुवाकंयजमानंवाचयन्नद्भिर्मार्ज
यतिआमात्यादिध्मादीप्यान्वाहार्यपचनेवेलायांसादयित्वाबर्हिषापरिस्तीर्याज्यंवि
लाप्योत्पूयोत्तरतएतानुपसादयतिचतुरउदकुंभान्त्रीनोदुंबरांछूलानोदुंबरीन्दवरमेकां
चपाश्रपणीमविज्ञातवामोदुंबरीमेवदक्षिणतःसर्वानेवान्यान्तूस्थालीपाकांस्तेनयजि
कास्तंभारोनेरकोपबर्हणेअंजनाभ्यंजनेआज्यंतृणमुष्टिꣳस्यꣳसूत्रमिनिदक्षिणा
तोधिदेवनंकरोतिनेदकान्नपंचाग्नेरुत्तरान्निवपत्यथस्फ्यमादायसकृद्देवदक्षिणेाꣳ

आधान ८ सपहता असुरारक्षाꣳसि पिशाचायेसयंनिष्टथिवीमनु॥अन्येत्रेतोगछतियेत्रेतेषांगतंम
नइत्यथैनद्दिरेवोक्षत्युदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः॥असुंयईयु
रटकाक्रन्नक्षत्तेनोवंतुपितरोहवेषुत्यथोल्मुकमादत्ते॥ ८ ॥यआरद्दानाःस्वधया
नवानिपित्र्याणिरूपाण्यसुराश्चरंति॥परापुरोनिपुरोयेभरंत्यग्निष्टानस्मात्प्रणुनो
कुयज्ञादितिनेनोद्भनमभिनपत्यग्निःपावकःरुद्रिनानिरुण्वन्निनोरुरान्नुदनादूरमो
कसः॥पितृणांयेवर्णरुत्वेहभागमिछंनइतिनदत्रेवव्यंनंकरोतिनस्मिन्नुल्मुक आभ्यस्ता
कंप्रश्चोतयतिदक्षिणाग्निंबर्हिस्तृणातिसकृदाछिंनंबर्हिरूर्णामृदुस्योनंपित्रभ्यस्ता
राभ्यहं॥अस्मिन्त्सीदंतुमेपितरःसोम्याःपितामहाःप्रपितामहाश्चानुगेःसहेत्यथापि
नौ मृन्मयंबाहृयमुदीराणाइहसंतुनःसोम्याःपितरःपितामहाःप्रपितामहाश्चानुगेःसह॥
असुंगमाःसत्ययुजोहवंकासआनोहवंपितरोद्यागमंतु॥एहगछंतुपितरोहविषेअन्न



८

वे॥अस्मिन्यज्ञेबर्हिष्यानिषद्यमावीरःप्रमायुनगित्यथैष्यएरकोपबर्हिणेनिवेदयतआ
सनंन्नायनंचेमेनयाःसोम्यासआगताः॥प्रयाजनायनोभूत्वाशिवाभवयजंकरात्यथै
ष्यःपानान्याहरनिमधुपानंक्षीरपानंसक्तुपानंयद्वा भवत्यन्यन्नब्राह्मणेभ्योददात्य
न्यदुपनिनयनएतद्वःपितरःपितामहाःप्रपितामहाःपानमित्यत्रैनेनोदकुंभेनमार्जय
निनूर्ष्णीनदक्षानूपर्युपविशंति॥ ९ ॥चत्वारःपितापुत्राःपितापुरस्ताज्येष्ठोदक्षिणा
तोनुजःपश्चात्कनीयानुनरतोद्वादशाक्षान्पितापुत्रश्चिनद्विजयतेद्वादशाज्येष्ठस्तद्वि
जयतेद्वादशानुजस्तद्विजयतेअथयेनिशिष्यंतेतान्कनीयान्समूहत्यथयद्विद्वोभवतो
द्विरायामःपितायद्येकोजायातृतीयाथयदिवैनभवत्युभौद्विरायोभोजायायतीए
षएवत्रिषुन्यायएषएवद्वयोःरुनंरुनमित्येवव्यपगछंतियूनोगोरीत्युक्तोनिष्टत्य
थैष्यावहिरादायगामुपकरोतिपितृभ्यस्त्वापितामहेभ्यस्त्वाप्रपितामहेभ्योजुष्टामु

पाकरोमीतिदक्षिणाग्निमित्येकेयेनाग्निःप्रोक्षतिपितृभ्यस्त्वापितामहेभ्यःप्रपितामहेभ्योजुष्टं
प्रोक्षामीतिनूष्णीमित्येकेनामत्रेवप्रतीचीनंशिरसीदक्षिणापदीसंस्रवंतितस्यैसंस्रवा
याअद्भिरभिषेकंप्राणानाप्याययतिनूष्णीवपामुत्खिद्यहृदयमुत्खरतिप्रज्ञानानिचाव
दायनिप्रज्ञानौचमतस्कृतान्येनेधेवस्रुवेषूपनह्यतिसिन्नेवाग्नौश्रपयंतिस्रुतायांपंच
स्रुवाहुतीर्जुहोति॥ १० ॥याःप्राचीःसंभवंत्यापउत्तरतस्रवाः॥अद्भिर्विश्वस्यभुवनस्य
धर्त्रीभिरंतरन्यंपितुर्दधेस्वधानमःस्वाहा॥अंतर्दधेपर्वतैरंतरिक्ष्याष्टथिव्या॥दिवादि
शिरंतरिक्षेणाभिरूतिभिरंतरन्यंपितामहाद्दधेस्वधानमःस्वाहा॥अंतर्दधदृतुभिरहोरात्रैः स्वा
ससंधिकैः॥अर्धमासैश्चमासैश्चांतरन्यंप्रपितामहाद्दधेस्वधानमःस्वाहा॥यन्मेमा
नाश्रलुलोमचरत्यनुनुव्रता॥तन्मेरेतःपितावृंक्तामाशुरन्योपपद्यतांस्वधानमःस्वा
हा॥यद्वःक्रव्यादंगमदहृल्लोकाभयन्मरणायजानवदाः॥तद्वोअहंपुनरावेशयामि १

रिष्टाःसर्वैरंगैःसंभवंतिपितरःस्वधानमःस्वाहेतित्रेधावपांविछिद्योदुंबर्यादर्व्याजुहोतिसो
मायपितृमतेस्वाग्नेयायकव्यवाहनायस्वाहेतिहविः॥वाजिन्निदंजुषस्वनःस्वजाहव्यंदेवेभ्यःपितृभ्यः
स्वधानमःस्वाहा॥अंगिरस्वंनःपूनयेयमंपितृमंतमाहुवे॥वेवस्वंतेदमथिनःस्वजा
हव्यंदेवेभ्यःपितृभ्यस्वधानमःस्वाहा॥यदग्नेकव्यवाहनपितृन्यक्षमृतावृधः॥प्रदेवेभ्यो
हव्यंवहोपितृभ्यश्चस्वजाहव्यंदेवेभ्यःपितृभ्यःस्वधानमःस्वाहेतिनूष्णीदर्वीमिश्राधाय
पिंडानामावृतेनान्यवदानानिददातिहृदयमवाग्नेयंसव्यंमतस्कमयदक्षिणंमतस्नेनना
सोयेचत्वामनुयाःश्चत्वमन्वस्येषानेननस्वधाक्षितिर्यावतीष्टथिवीनावनीतेमात्रा
तावतीनएतामात्रांभूतंददामिष्टथिव्यामितमसितनायमाक्षेष्टारंतिद्विनोयंददात्येत
त्तेपितामहायसोयेचत्वामनुयाःश्चत्वमन्वस्येषानेपितामहस्वधाक्षितिर्यावदं
तरिक्षंनावतीनेमात्रानावतीनएतामात्रांभूतंददाम्येतंरिक्षेणामितमसिपितामहाय

मोक्षिष्टाइतिनृतीयांददातिएतत्तेप्रपितामहासोयेचत्वामनुयाꣳस्त्वमत्रान्वस्येषातेप्रपितामहस्वधाक्षितिर्यावनीद्यौस्तावतीतेमात्रातावतीतएनामात्रांप्रतिददामिदिवाभितमसिप्रपितामहायमोक्षिष्टादित्यत्रपितरोयथाभागंमदध्वमित्यूक्त्वान्त्रेकेनोदकुम्भेनमार्जयतितूष्णीमन्येत्यागमुपपरेत्यलोहितमुपप्रवर्तयन्त्यानिरक्षाꣳस्यसृग्मागानियेचापिपितरोहरंतोविहरंतांतृप्यंतुरुधिरस्यते ॥ येनःपतितागर्भाअसृग्मानउपासते ॥ तेभ्यःस्वजास्वधानमःस्तृण्वंतुमरंतुच ॥ यआमायेचपक्वायेचदुष्टाःपतंतिनः ॥ तेभ्यःस्वजास्वधानमःस्तृण्वंतुमरंतुच ॥ येकुमारायास्त्रियोयेविज्ञाताःपतंतिनः ॥ तेभ्यःस्वजास्वधानमस्तृण्वंतुमरंतुचेत्यागत्याजनंददात्यथाभ्यंजनंददात्यथवासाꣳसिददात्यथषड्भिर्नमस्कारैर्विपर्यासमुपतिष्ठतेथवीरंयाचतेथैनानुस्थाप्यप्रवाह्यनिसृष्टिर्मन भआवृयतेमनोन्वाहुवामहआनएतुमनःपुनः १०

पुनर्नःपितरोमनइत्यत्रैतद्वस्त्रंवासएवविदेब्राह्मणायदत्वान्यद्वसनीयंवासःपरिधायदक्षिणोपपरेत्याद्भिर्मार्जयते ॥ ११ ॥ यासूगधारसावर्णाबलंचनिहतउमे ॥ तामआपःशिवासंतुदुष्कृतंप्रवहंतुमे ॥ यार्ऊर्जमभिषिंचतिदेवेप्रेषितामही ॥ तामआपःशिवासंतुदुष्कृतंप्रवहंतुमे ॥ यासांनिष्क्रमणेसर्वमिदंजायतेजगत् ॥ तामआपःशिवासंतुदुष्कृतंप्रवहंतुमे ॥ यासामिमेत्रयोलोकास्तेजसायद्वासातृताः ॥ तामआपःशिवाःसंतुदुष्कृतंप्रवहंतुमे ॥ याःप्राचीर्यादक्षिणायाःप्रतीचीर्योउदीचीर्योऊर्ध्वारेवतीर्मधुमतीरापःस्रवंतिसरुक्ताः ॥ तामआपःशिवाःसंतुदुष्कृतंप्रवहंतुमइत्यत्रैतद्वसनीयंवासोविमुच्यान्यत्परिधायप्राजापत्ययर्चाग्नेरुदनिप्रजापतेनत्वदेतान्यन्यइत्योल्मुकमपिसृजत्यमूनोदूतोहविषोजानवेदाअवाट्व्यानिसुरभीरिकृत्वाप्रादात्पितृभ्यःस्वधयानेअस्मन्प्रजानेमेनपुनरप्येहिदेवानित्यत्रैतान्यवदानिब्राह्मणेभ्योददाति

हृदयमेवाग्नेयसच्यंमनस्तु मृथदक्षिणंयथाश्रुस्रुमलंकुरुतेगार्हपत्यमन्त्राःकृत्वा
ब्राह्मणेभ्योवरंददात्यथहयेकेचेतस्येमांसलमंतेसर्वेहवाअस्येतेगोमाजन्योमा
वंत्यमात्येजयानभ्यानानोन्नाष्टमृतइतिहुत्वामात्यहोमंजुहोति॥एषएवाउप
वसथउपह्वस्मिन्देवावसंनिप्रातर्जेष्यामोवामंवखिल्यतस्वंदेवानांवामवरूथ
दाग्नेयोष्टाकपालउपहेनंवामंवसूगछंतियस्यहवाएनामंवंविद्वान्नाकल्पयते
सर्वंपाप्मानंतरतितरतिब्रह्महत्यामपपुनर्मृत्युंजयतीतिहोवाचप्रजापतिस्तानि
हवाएनानिकूरमाडानीत्याचक्षतेकाजयानीतिवामात्यहोमाइतिवातिमोक्षाइति
वासयत्किंचास्मिंलोकेपापंकरोतिसर्वस्मात्तस्मान्निर्मुच्यानृणाःस्वर्गंलोकमेती
तिहोवाचप्रजापतिः॥ १२ ॥अग्नीनाधास्यमानोभवतिसउपकल्पयतउषाश्व
सिकताश्वावृकरंचवल्मीकवपांचसूदंचवराहविहतंचपुष्करपर्णीचत्रीकृताश्वे ११.

त्थेपार्थिवाअथवानस्पत्याअश्वत्थश्चोदुंबरश्चपर्णश्चवत्रामीचविकंकतश्चात्रानि
हतश्चवत्रामीगर्त्यावरणीमुंजकुलायंचित्रियस्याश्वत्थस्यनित्रःसमिधआहरेत्सप
लाशाःसप्ताशिरोहाःप्रादेशमात्रीरप्रतिशुष्काग्राःषट्हिरण्यशकलान्तूत्तरेसोवर्णी
स्त्रीन्प्रजातानग्रंपूर्ववाहंरथचक्रंब्रह्मौदनिकान्व्रीहीन्सर्वौषधीरोहितंचर्मानुडुहन
वानियज्ञपात्राणित्यथास्माअरणीआहरतियोअश्वत्थःवामीगर्तमारोहत्वस
चाशंतंनेहरामिब्रह्मणायज्ञियैःकेतुभिःसहेत्यथैतान्मन्त्राणामेवमीमांसांकु
र्वन्तिकास्वग्निमादधीतरोहिण्यामग्निमादधीतपुनर्वस्वोरग्निमादधीतपूर्वयोःफ
ल्गुन्योरुत्तरयोःफल्गुन्योश्चित्रायामितिअथातऋतूनामेवमीमांसावसंतेब्राह्म
णोग्निमादधीतग्रीष्मेराजन्यःशरदिवैश्यावर्षीरथकारइत्यथोखलुयदेवैनं
श्रेष्ठोपनमेदयादधीतसेवास्यर्धिरितिनेदनदार्तस्यातिवेलंवाश्रेष्ठायुक्तस्याथ

वैब्राह्मणंभवतियोरोहिण्यामग्निमग्निमादधानऋध्नोत्येवसवीनोहान्नोहनिसाया
वैश्वारव्याःपौर्णमास्याउपविष्टादमावास्याभवतिसासकृत्संवत्सरस्यरोहिण्यास
पद्यतेतस्यादाधीतेत्यथैतत्पुरस्तादेवजुष्टेदेवयजनेगारंवानिमितंवाकारितंभ
वतिनस्यद्वद्वारोकुर्वंतिप्राचीचरक्षिणांचमध्येगार्हपत्यस्यायतनंकुर्वंतिपुरस्ता
द्वादशरूप्रक्रमेषाहवनीयस्यापिवाचक्षुर्निमितेदक्षिणतोविषुवत्यन्वाहार्यप
चनस्यापिवायथाद्यौभामोप्राक्स्यानामकःपश्चादित्येवंत्रेधोश्रित्यावोक्ष्यकेश्म
श्रुवपतेनखानिनिकृंततएवंपत्नीकेशवर्जमुभौभानुषेणालंकारेणालंकु
तोभवतोहतोहतवाससावथाप्यांज्यतोपायनीयंवाचयतिनस्यान्तितोभवतःस
र्पिर्मिश्रस्यपयोमिश्रस्यवा॥ १३ ॥अथाधिसूर्यंदृक्षेयाचतिसर्वौषधमाज्य
स्यालोससक्तवांसक्तंवहिर्वासोदध्यांछकलानित्येतत्समादायसंभृत्यभाजं १२

बर्हिषंवोत्तपनीयंवाग्निप्रवर्जंतिनस्मिन्दध्यांछकलांस्प्रकीर्यबर्हिषापरिस्तीर्यआ
ज्यंविलाप्योत्पूयाज्जलिनोपस्तीर्णेधारयतिसर्वौषधंजुहोत्यग्नयेसर्वौषधायपु
ष्टिप्रजननायस्वाहेत्यथजयानभ्यानानान्राष्ट्रभृतइतिहुत्वामात्यहोमान्जुहोत्य
थस्रुचिचतुर्गृहीतंगृहीत्वाप्राजापत्यांजुहोतिप्रजापतेनत्वदेतान्यन्यइत्यपरंचतु
र्गृहीतंगृहीत्वानुरूप्याजुहोत्यन्वग्निरुषसामग्रमरुव्यदन्वहानिप्रथमोजानवेदाः
अनुसूर्यस्यपुरुत्राचरश्मीननुद्यावापृथिवीआततानस्वाहेत्येतानंगारान्संतवा
न्नारावेवायजमानोगृह्णातिआयुषेवागृह्णामितेजसेवागृह्णामितपसेवागृह्णा
मिवीर्यायवागृह्णामिब्रह्मवर्चसायवागृह्णामित्येतेनानादायापनिष्ठतिआयु
र्मामाविन्नायुर्मूतिर्मामाविन्नायुर्ब्रह्मवर्चसंमामाविन्नायितितानध्वर्यवेसंप्रदा
योदायंसन्नारब्धेयजमानएतेनैवयथेतमेत्योत्तरेणागारंपत्नीत्यपूर्वयाद्वाराप्र

पद्यगार्हपत्यस्यायतनेन्युप्योपसमाद्धातिपरिस्तृणंतिदक्षिणतउपविन्नोब्रह्मा
चयजमानश्चाथैतद्रोहितंचर्मानडुहंजघनेनाग्निंप्राचीनग्रीवमुत्तरलोमापस्तृणा
तितस्यबहवःकोलेचतुरःपात्रान्नीहीन्निर्वपतिब्रह्मणेजुष्टन्निर्वपामीतिवानूप्णी
वाथनिरुप्तानभिमृत्रात्याकूयेत्याकामायत्वासमृधेत्वित्यथैतान्नीहींछूर्पेसमुप्याद्वि
रप्युस्यंचर्मोदूहत्यथैतस्मिन्नेवचर्मण्युलूखलमुसलेनिधायावहत्यथैतेनैवपात्रे
णेवचतुरउदपात्रानानयतियदिन्नीडितास्यालीभवतियद्भवाअभ्रिडीतापंचवाभूय
सोवाससमादकःसंपद्यते॥ १४ ॥तंयएवकश्चनकुशलःपरीधेश्चपयित्वाग्निधा
र्यादंचमुद्वास्यत्यथैतंमायतीगवमृत्विग्भ्यःप्राहरुपसंगलंतएनंमनहविजोथै
तांपात्रीनिर्णिज्योपस्तीर्यतस्यामेतंमसंभृतिवोत्थरतिसर्पिरासेचनंहुत्वाप्रघूतमा
ज्यमानीषायैतस्थेवादनस्योपघातंजुहोत्युपतिष्ठेतवाग्नवेधसेकवयेमध्यायवो १३

वंदारुवृषभायवृष्णे॥यतोभयमभयतन्नोअस्त्ववेदवान्यजेहद्वान्त्साहेत्यैतांश्चतुर
आर्षेयानुत्तरतोनुदिशमुपवपत्यननुपूर्वमाचमय्यैतेभ्यएनंभूमिंस्पृशन्मनुछिद्र
निवोपोहतिस्त्रिःप्राचीप्रतींसंतिराध्रस्तेब्रह्मोदनंहितेभ्यःसांडवत्सनरंददात्यथैष
उत्तरतआसीनोब्राह्मणःसामकाषंप्राश्नातितस्मैयदस्योपकल्पयतेनंददात्यथय
दाज्यमुछिष्यतेनेनसमिधोभ्यज्यादधातिसमिधाग्निंदुवस्यनघृतेबोधयतातिथिं॥
आस्मिन्हव्याजुहोतनस्वाहा॥उपत्वाग्नेहविष्मतीर्घृताचीर्यंतुहर्यत॥जुषस्वसमिधो
ममस्वाहा॥नत्वासमिद्भिरंगिरोघृतेनवर्धयामसि॥बृहच्छोचायविष्यस्वाहाविभाय
त्रीभिर्ब्राह्मणस्यत्रिष्टुभाराजन्यस्यजिघर्म्यग्निमाज्याजिघर्मीयुदीअग्नेहविषाजुषा
णस्तिजगतीभिर्वैश्यस्यजनस्यगोपाअजानिष्टजागृविस्त्वामग्नेमानुषीरीडतेविशः
सप्ततेअग्नेसमिधःसप्तजिह्वाइतिसमित्कृवत्सनरंददात्यथास्माअरणीप्रयच्छन्ना

हवाचंयमोभविष्यसिस॒ग्नाधियनेस॒श्रिष्यामिनिसआहब्राह्मणानावायनाश्चंगोपाय
तसंभारांनिधनेतिनस्यसूभिक्ष्यमग्न्याधेयंसवनिसाग्न्याधेयस्यसमृद्धिस्तदाहुनाग्न्या
धेयेगांकुर्वीतघोररूपमिनिकुर्वीतेवापित्वंवनकुर्वीतापिबर्हारंपिकुर्वीतानुचैनस्यम
वेक्षुण्याप्रज्ञांसेनिकाय्योथास्माअरणीप्रयछतितप्रतिगृण्हाति॥ १५ ॥महीद्यौपृथि
सदनेऋतस्यावचीएतधरुणेरयीणां॥अंतर्वलीजन्यंजानवेदसमध्वराणांजनयथःपु
रोगां॥आरोहतंदक्षतं॒शाक्वरीमभितंनाग्न आयुषावर्चसासह॥ज्योग्जीवंनउत्तरामुत्तरा
॒समांदर्शमहंपूर्णमासंयज्ञंयथायजात्येथेनउपनिगृण्हात्यृतियवनीस्योअग्निरेन
सोगर्भंदधातेवामहंदेदे॥नत्सत्यंयद्वीरंबिभृथोवीरंजनयिष्यथः॥तंमत्मानःप्रजनि
ष्यथेनेमाप्रजातेप्रजनयिष्यथः॥प्रजयापशुभिर्ब्रह्मवर्चसेनसूवर्गेलोकऋत्येथेनम
नृतात्सत्यमुपनयतिमानुष्योदेव्यमुपनयतिरदमहमनृतात्सत्यमुपैमिमानुषोदेव्य १५

मुपैमिदेवीवाचंयछामितिनंवाचंयमरात्रीजागरयंतआसतेवाल्केस्ता॒रात्रिमग्नि
मिंधीतनाल्केरग्निमिंधानउभेलोकोसंनमहं॥उभयोर्लोकयोर्ध्वानिमृत्युंनराम्य
हमित्युत्तरेणगार्हपत्यस्यायतनंकल्माषमाजंबध्नातितेनेनमाधास्यमान॒संस्त्रा
पयतिप्रजाअग्नेसंवासयात्मा॒स्वपशुभिःसह॥राष्ट्राण्यस्माआधेहियान्यास॒स्तवि
तुःप्रसवऋति॥ १६ ॥अथाध्वर्युरपरात्रआदित्यारणीनिष्टपतिजातवेदोभुवनस्य
रेतऋहसिंचतपशोयज्ञनिष्पते॥अग्निमश्वस्यादधिहव्यवाह॒मामीगर्भाज्जनय
न्योमयोभूः॥अयंतेयोनिर्ऋत्वियायतोजातोअरोचथाः॥नजानन्नग्नआरोहाथा
नोवर्धयारयिमित्येथेनमग्नि॒संनेसमुप्यदक्षिणेतोज्वलयंतआसनेथेनान्यग्मा
यतनानिसकृत्सिंडेनपरिलेपयत्यथंतीय॒समराणामादायगार्हपत्यस्यायत
नेनिवपतियत्पृथिव्याअनामृत॒संबभ्रूक्वेसचा॥तदग्निरग्नयेददातस्मिन्नाधी

यनामयमिनिसयन्नोषानुपाधिगछतिनज्जपतियदद्श्वंद्रमसिकुछंनदपीहेत्यथेना
नाद्धातिदिवस्त्वावीर्येणपृथिव्येमहिम्नाअंतरिक्षस्यघोषेणसर्वपशुभाद्धद्र
त्येथेनांनासंप्रयामिसंवःसृजामिहृदयानिसꣳसृष्टंमनोअस्तुवः॥सꣳसृष्टःप्रा
णोअस्तुवः॥संयावःप्रियास्तनुवःसंप्रियाहृदयानिवः॥आत्मावोअस्तुसंप्रियःसं
प्रियास्तनुवोममैषांथेनान्कल्पयतिकल्पेतांद्यावापृथिवीकल्पंतामापओषधीः
कल्पंतामग्नयःपृथङ्ममज्येष्ठायसव्रताः॥येग्नयःसमनसोंतराद्यावापृथिवी
वासंनिकाशतूअग्निकल्पमानाइंद्रमिवदेवाअभिसंविशंत्वित्यथानिशिष्टानां
संभरणामर्धानादायदक्षिणद्वारोपनिहत्यान्वाहार्यपचनस्यायतनेनिवपतियद्
नरिक्षस्यानामृतꣳसंबभूवतेसचा॥तद्युरग्नेयदद्यानस्मिन्नाधीयनामयमिनि
सयन्नोषानुपाधिगछतिनज्जपतियदद्श्वंद्रमसिकुछंनद्वपीहेतिनक्षद्धातिन

थासंप्रयोतिनथाकल्पयत्यथेतेनेवयथेतमेसातिशिष्टंसंभारानादायपूर्वयाद्वारोपनिर्क्र
त्याहवनीयस्यायतनेनिवपतियद्दिवोनामृतꣳसंबभूवतेसचा॥तदादित्याग्नेयदद्यानस्मि
न्नाधीयनामयमिनिसयन्नोषानुपाधिगछतिनज्जपतियदद्श्वंद्रमसिकुछंनदपीहेतिन
यद्धातिनथासंप्रयोतिनथाकल्पयत्यथगोसारंसमादित्यानिसआहविहनाअग्नयोमा
कश्चनांतरेणसंचारीदित्यथाध्वर्युःप्रदक्षिणमावृत्यप्रत्यङ्दुत्यगार्हपत्यस्यायतननउप
रिसंभारेषुमुंजकुलायंनिदधातिनस्मिन्प्रतीचीनप्रजननामधरारणींनिधायदक्षहो
त्रोत्तरारणीमवदधातिनसआहमंथतेनियजमानोमंथतियजमानउत्तमोमंथतिजनय
तिजातेवरंददामीतिवाचंविसृजतेथेनमुपनिष्ठतेजीजनंतमृतंमर्त्यासोस्मिमाणंतर
पिंवीडुजंभं॥दक्षास्यसारोअक्रवःसमीचीःपुमांसंजातमभिसंरभंतामित्यथेनमभि
प्राणितिप्रजापतेस्त्वाप्राणेनाभिप्राणिमिपूछःपोषेणमह्यं॥दीर्घायुत्वायशतशारदा

यशातꣳरारत्सआयुषेवर्चसेजीवातवेपुण्यायप्राणेत्वामृतमादधामि॥अन्नादमन्नाद्यायं॥
गोसारंगुस्यारंगुस्याइत्यथोह्यातारमाहरंथंनरंब्रूहीत्यथैनमादधातिभूर्भुवोधर्मःशिरस्त
दयमग्निःसंप्रियःपशुभिर्भुवत्॥ऊर्दिलोकायतनायायच्छभृगूणांत्वांगिरसांव्रतपतेव्र
तेनादधामीतिभृग्वंगिरसामादध्यादादित्यानांत्वादेवानांव्रतपतेव्रतेनादधामीत्यन्वा
सांब्राह्मणीनांप्रजानांवरुणस्यत्वाराज्ञोव्रतपतेव्रतेनादधामीतिराजन्यस्यमनोस्त्वाग्राम्ण्याव्रतपतेव्रतेनाद धामीतिवैश्यस्य
ऋक्षूणांत्वादेवानांव्रतपतेव्रतेनादधामीतिरथकारस्येतियथर्षियथागोत्रंगायत्रेणछंदसेतु
त्तरतोहिरण्यंयत्रोत्कमुपास्यतिस्वयातनुवासंसेवत्येथेनंराजनंदृषलायवाज्ञातायवातिप्र
यछस्यार्तिमेवातिप्रयछतीतिब्राह्मणमेथेनमुपनिष्ठतेअहंत्वदस्मिमदसित्वमेतन्ममा
सियोनियोनिस्त्वयोनिरस्मि॥ममैवसन्वहहव्यान्यग्नेपुत्रःपित्रेलोकछ्ज्ञातवेदः १६

सुगार्हपत्योविदहन्नरातीरुषसःश्रेयसीःश्रेयसीर्दधत्॥अग्नेसपत्नाꣳअपबाधमानो
रायस्पोषमिषमूर्जमस्मासुधेहीति॥ १७ ॥अथैतमग्निमादत्तेयएषसमुत्तामव
तिंदक्षिणयाद्वारापनिहृत्यान्वाहार्यपचनमादधातिभूर्भुवोवातःप्राणस्तदयमग्निः
संप्रियःपशुभिर्भुवत्॥ऊर्दिलोकायतनायायपितुंपचअमीषांत्वादेवानांव्रतपतेव्र
तेनादधामीतियथर्षियथागोत्रंगायत्रेणछंदसेत्युत्तरतोहिरण्यंयत्रोत्कमुपास्यतिस्व
यातनुवासंसेवेति॥अथैनंराजनंदृषलायवाज्ञातायवातिप्रयछस्यार्तिमेवातिप्रयछ
तीतिब्राह्मणमपिवागार्हपत्यादन्वाहार्यपचनमादधातिप्रजापतिरग्निमसृजत
सोबिभेत्यस्मादधस्यतीतितस्यत्रेधाविहिमानंव्योहल्लोत्याअग्रदाहायेत्येतस्माद्ब्राह्म
णादथैनमुपनिष्ठेतरमाउमामुपतिष्ठेतुरायओभिःप्रजाभिरिहसंवसेयं॥इहे
ाइडांतुनिष्ठेतुविश्वरूपीमध्येवसोदीदिहिजातवेदइत्यथैतेनैवयथैनमेत्यास्यादधा

नीधंप्रणयनीयंनंतथाभ्याद्धानियथामन्येनेधोहितेसूर्यआहवनीयआधीयमानःसं
पत्यनद्दितनस्यसंपयनउपोपयमनीःकल्पयंत्यश्चएषपूर्ववाट्पत्नून्निनःपुरस्ता
त्तिष्ठत्यथोद्गातारमाह्वामदेव्यंब्रूहीत्यथेनमुद्यछओजसेबलायत्वोद्यछदृषणेशु
ष्मायायुषेवर्चसे॥सपलनूरसिदृत्रतूर्यस्तेदृषुमहिमास्कवर्गः॥यत्तआत्मापशु
षुप्रविष्टःपुष्टियोनेमनुष्येषुमन्थेतयानोअग्नेजुषमाणोहि॥दिवःपृथिव्याःप
र्यंतरिक्षाद्वातात्पशुभ्योअध्योषधीभ्यः॥सत्रयत्रयत्रजानवेदःसंबभूथतनोनोअ
ग्नेजुषमाणोहीनीयत्येग्रहरत्यथेत्यत्यथेयत्यधोधःशिरोहरतीब्राह्मणमाद्रान
एवैतामात्माअभिसंपादयेदित्येतदश्वंरअश्वंपूर्वेनयंतिनमनुमंत्रयतेप्राचीमनु
प्रदिशंप्रेहिविद्वानग्नेरग्नेपुरोअग्निर्भवेह॥विश्वाआशादीद्यानोविभात्यूर्जनोधे
हिद्विपदेचतुष्पदेदृतिविषुवत्युपरमंतिविक्रमस्वमहाँअसिवेदिषन्मानुषेभ्यः॥ १७

त्रिषुलोकेषुजागृहीत्यथोयानियंत्यन्वग्निरुषसामग्रमक्ष्यदन्वहानिप्रथमोजातवेदाः
अनुसूर्यस्यपुरुत्राचरन्मीननुद्यावापृथिवीआततानेत्यथैतेनाश्वेनप्राचोन्नरतःपा
श्चेनःसंभाराणामाक्रयतियथाहितस्याग्नेरंगाराअभ्यूववर्तेरन्नित्यथैनंप्रदक्षिणा
मादित्याद्धिरण्मयात्पात्रादुच्चमुत्सृजतिसएषोऽक्षयोभवत्यन्यद्ब्राह्मणेददात्यथप्रदक्षिणा
मादित्येधंप्रतिष्ठापयतियदिदंदिवोयदद्दःपृथिव्याःसंविदानेरोदसीसंबभूवतुः
नयोःपृष्ठेसादनुजातवेदाःशग्मःप्रजाभ्यःसनुवेस्योनः॥आणंत्वामृतादधाम्य
भादमन्नाद्यायगोसारंगुप्त्याइत्यथोद्गातारमाहबृहद्रथंतरीयंवैनमितिसामगा
येनिसर्वाणिसंभ्रेष्यद्बृहतीगीयमानआहवनीयमादधातिपूर्भवःस्ववर्कश्वस्क
न्दसोसूर्यस्तदयमग्निःसंप्रियःपशुभिर्भुवत्॥यत्तेशुक्रंशुक्रंवर्चःशुक्राननूः
शुक्रंज्योतिरजस्रंतेनमेदीदिहितेनत्वादधेअग्निनाग्नेब्रह्मणाअमीषांलोदेवानां

व्रतपतेव्रतेनादधामीतियथर्षियथागोत्रंगायत्रेणछंदसेत्युत्तरतोहिरण्मयान्कमुपास्य
तिस्वयाननुवासंमवेत्येतंराजतंवृषलायवाश्वेतायवानिप्रयच्छत्यानिमेवानिप्रयच्छ
तीतिब्राह्मणमथैनमुपतिष्ठतआनेत्र्याव्यानेत्रासर्वमायुर्व्यानेत्राइत्येतेनावग्नीआद्
धातिसमिध्यंचावसथीयंचाथरथचक्रंप्रवर्तयतिसंततंगार्हपत्यादाहवनीयान्॥ १८
सर्वौषधेनव्याहृतिभिरग्नीछमित्वापंचपंचनानाहृतीयाःसमिधोभ्यज्याद्धाति
समिध्यमानःप्रथमानुधर्मइत्येताभिःपंचभिरायुर्दाअग्नेहविषाजुषाणइत्येतामपो
धृत्याथप्रदक्षिणमावृत्यप्रत्यङ्मुत्यजघनेनगार्हपत्यंतिष्ठन्नूभिरुपनिष्ठतेये
नेअग्नेश्रिवेतनुवो॥विराड्वसराट्॥तेमाविन्वन्तांतेमाजिन्वन्तां॥येनेअग्नेश्रिवेतनुवो॥
संम्राड्वसिभ्रूस्व॥तेमाविन्वन्तांतेमाजिन्वन्तां॥येनेअग्नेश्रिवेतनुवो॥विभूस्वपरि
भूस्व॥तेमाविन्वन्तांतेमाजिन्वन्तां॥येनेअग्नेश्रिवेतनुवो॥प्रभूस्वप्रभूतिस्व॥तेमाविन्व १८

न्तांतेमाजिन्वन्तां॥यास्तेअग्नेश्रिवास्तनुवस्ताभिस्त्वाधृतिसर्वाभिर्गार्हपत्यंसर्वाभिरन्वाहा
र्यपचनंसर्वाभिरहवनीयमथोयास्तेअग्नेघोरास्तनुवस्ताभिरमुंग
ळोकमन्वयंयजमानोद्वेष्टिंतंमनसाध्यायेत्यथापउपस्पृश्यविराजंक्रमेरुपनिष्ठतेनर्यप्रि
यांमेगोपाय॥अमृतत्वायजीवसे॥जातांजनिष्यमाणांच॥अमृतेसत्येप्रतिष्ठिताभिर्गा
र्हपत्यमथर्वपितुंमेगोपाय॥सप्तमन्मिहायुषे॥अदब्धायोशीततनो॥अविषन्नःपितु
कृणिवित्यन्वाहार्यपचनं॥राऽस्यपश्यन्मेगोपाय॥द्विपादोयेचतुष्पदः॥अष्टाश्राफाश्च
यइहाग्ने॥येचैकश्राफाआमुगाः॥इत्याहवनीयं॥सप्रथसमांमेगोपाय॥येचसभ्याः
सभासदः॥तानिंद्रियावनःकुरु॥सर्वमायुरुपासतामितिसभ्यं॥अहेबुध्नियमंत्रंमे
गोपाय॥यमृषयस्त्रयिविदाविदुः॥ऋचःसामानियजूंषि॥साहिश्रारमृतासना
मित्यावसथीयं॥अथगार्हपत्यआज्यंविलाप्योत्पूयशुचिनुगृहीतंगृहीत्वासमि

द्वयसमिद्वत्याहवनीयेपूर्णाहुतिंजुहोतिसमग्नेअग्नेसमिधःसमज्जिह्वाऽसिपूर्णाहुतेवरंद
दात्यथैतान्यग्निहोत्रपात्राणिप्रक्षालिनान्युत्तरेणगार्हपत्यमुपसादयतिकूर्चवासूनाया
वास्थालीसक्रवाक्रचमभिद्योतनंसमिधमित्येनामग्निहोत्रीदक्षिणतउदीचीस्थाप
यित्वाब्राह्मणोवादोग्धिपूर्वेदुह्याद्परेदुह्यान्नसमृद्धाहुयोदुह्यात्पशुकामस्यत्यधिश्रि
त्योत्तरमानयत्येतेनदग्निहोत्रमग्रेणाहवनीयंपर्याहृत्यपूर्वयाद्वाराप्रपाद्यजघने
नगार्हपत्यमुपसाद्यतस्मिन्नग्निहोत्रविधिंचेष्टित्वासमिधमुपयत्यप्राङ्हरतिज
घनेनाहवनीयमुपसादयतिकूर्चेनैनाऽसमिधंमध्यतआहवनीयस्याप्यादधातिनू
र्ध्नीनस्यामादाभायांप्रतिमुखंहुत्वाजुहोतिऊर्ध्वमार्ष्यवाचंनमार्ष्टुभयमेवान्नानीति
ब्राह्मणंद्विरंगुल्याप्राश्योदङ्पर्याहृत्यप्राचीनदंडयाक्रचामस्तयतिनिर्णिज्यक्रचं
निष्टप्याद्भिःपूरयित्वोद्गुह्यतिसमग्नषेनेवप्रीणातिब्राह्मणंहुत्वोपसमिंधेब्रह्म १९

वर्चसस्यसमिध्यअपोनिनयत्यवभृथेस्येवरूपमकरितिब्राह्मणं॥ १९ ॥अथपरिक्रमि
णंहरेचैवहिर्लावंप्रहिणोत्यप्याहृतवायजुषाकरोत्यथपृष्ट्याऽस्त्रीर्वायःप्रणीयाग्नेय
मष्टाकपालंनिवपत्यन्द्राहोतारंव्याचक्षीतसामिधेनीरनुवस्यन्द्राहोतारंव्याचक्षीत
अपयित्वासादयतिनस्याःपंचदन्नासामिधेन्यःपंचप्रयाजावार्त्रघ्नावाज्यभागावथह
विषोग्निर्मूर्धाभुवदतित्रिष्टुभौसंयाज्येन्वाहार्यमासाद्याग्न्याधेयदक्षिणाद्दात्याद्वादन्न
भ्योददातिकामंभूयसीर्ददातिसंतिष्ठतएषेष्टिःसपूर्णपात्रमिंधुक्रमानविसृज्नेग्नेनय
थतदानीमेवपृष्ट्याऽस्त्रीर्वायःप्रणीयेंद्राग्नेमेकादन्नकपालंनिर्वपत्यादित्यंचरुंघृत
एषचरुर्भवतिश्रृतेनेनदीयसिवाज्यमानयतिअपयित्वासादयतिनस्याःपंचदन्नासामि
धेन्यःपंचप्रयाजावार्त्रघ्नावाज्यभागोअथहविषइंद्राग्नीरोचनादिवःअथयद्वत्रमि
त्येंद्राग्नस्यादितिर्नउरुष्यतुमहीमूषुमातरमित्यादित्यस्यत्रिष्टुभौसंयाज्येन्वाहा

र्यमासाद्याथैनंचरुंव्युध्यत्यचत्वारआर्षेयाःप्राश्नंतिदिन्नामेवज्योतिषिजुहोतीतिब्रा
ह्मणंसंतिष्ठतएषेष्टिःसपूर्णापात्रविष्णुक्रमाविसृजतेव्रतमेवैतद्वादशाहंव्रतंचर
ति॥ २० ॥तस्येतद्व्रतंनानृतंवदतिनमाꣳसमश्नातिनस्त्रियमुपैतिनास्यपत्न्यूल
खेनवासःपत्न्यूलखंत्यमृन्मयपात्र्यमृद्वोच्छिष्टंस्वयंपादौप्रक्षालयतेनलवणम श्ना
तिनकोद्रवान्धान्यमन्यत्रतिलेभ्यःप्राङ्नास्यस्वयꣳसमिधआहरमाणोग्नीनामंते
संविशत्यजस्रमस्येतद्वादशाहमग्नयोमवंतिनास्यब्राह्मणोनाश्नीयाद्गृहवसेदित्य
ग्निहोत्रेजुहोतिवायजमानोभवतिभक्तमुपपत्न्याआहरत्यथद्वादशरात्र्यांव्युष्टायां
ष्टस्याꣳस्थालीपाकःप्रणीयाग्नेयंपवमानायपुरोडाशमष्टाकपालंनिर्वपतिश्रपयि
त्वासादयतितस्याःपंचदशसमिधन्यःपंचप्रयाजावार्त्रघ्नावाज्यभागावथहविषो
ग्नआयूꣳषिपवसेग्नेपवस्वेतित्रिष्टुभोसंयाज्येत्वाहार्यमासाद्यत्रिꣳशान्मानंहिरण्यं २०

दद्यातिसंतिष्ठतएषेष्टिःसपूर्णापात्रविष्णुक्रमाविसृजतेव्रतमथतदानीमेवष्टस्याꣳस्थाली
पाकःप्रणीयाग्नेयंपावकायपुरोडाशमष्टाकपालंनिर्वपत्यग्नयेशुचयेश्रपयित्वासा
दयतितस्याःपंचदशसमिधन्यःपंचप्रयाजावार्त्रघ्नावाज्यभागावथहविषोरग्नेपाव
कसनःपावकाग्निःशुचिव्रततमउदग्नेशुचयस्तवेतित्रिष्टुभोसंयाज्यत्वाहार्यमासाद्य
त्रिꣳशान्मानंचत्वारिꣳशान्मानंहिरण्येयद्दातिसंतिष्ठतएषेष्टिःसंपूर्णात्रविष्णुक्रमा
विसृजतेव्रतं॥ २१ ॥अथातोन्वारंभस्येवमीमाꣳसान्वारंभणीयमास्याःसमानो
पवसथंकरोत्यथप्रातर्हुतेग्निहोत्रेपुरायांप्रणयनाद्गार्हपत्यआज्यंविलाप्योत्पूयस्रुचि च
नुर्गृहीतंगृहीत्वाचनुहोतारंमनसानुद्रुत्याहवनीयेजुहोत्यन्वारब्धेयजमानेस्वाहेत्यप
रंचनुर्गृहीतंगृहीत्वासारस्वतेनोहोमोजुहोतिपूर्णापश्चादित्यनुद्रुत्यग्नीषोमीयंजुहो
त्यपरंचनुर्गृहीतंगृहीत्वानिवेशनीसंगमनीवसूनामित्यनुद्रुत्ययत्तेदनाअदधुर्भी

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

गधेयमितिजुहोत्यथष्टास्तीर्त्वायःप्रणीयाग्नोवेष्णवमेकादशकपालंनिर्वपतिसर
स्वत्येचरुꣳसरस्वतेद्वादशकपालमितिश्रपयित्वासादयतितस्याःपंचदशासमिधे
न्यःपंचप्रयाजावाज्यभागावथविष्णोग्नाविष्णुअग्नाविष्णुप्रणोदेव्यानो
दिवःपीपिवाꣳसꣳसरस्वतस्तनयेतसरस्वदुमीयदितिनिष्टोसंयाज्येचाहायंमासा
द्यमिथुनोगावेद्वादशतिसंनिष्टतएषेष्टिःसपूर्णपात्रविछुक्रमानविसृजतेव्रतंमथयो
र्णमासवैमृधाप्यांयजतेसंनिष्टतेग्न्याधेयꣳसंनिष्टतेग्न्याधेयं॥ २२ ॥इतिबोधा
यनसूत्रआधानप्रकरणं॥ ७ ॥